गन्धोत्तमा, स्त्री, (गन्धेन उत्तमा गन्धप्रधानेत्यर्थः ।) मदिरा । इत्यमरः ।२।१०।४० ॥

गन्धोलिः, स्त्री, (गन्धयति गन्धयुक्तं करोति संमिलितद्रव्यान्तराणीत्यर्थः । गन्ध + ओलच् ततो जातौ ङीष् निपातनात् ह्रस्वः ।) शटी । इति शब्दरत्नावली ॥

गन्धोली, स्त्री, (गन्धयति अर्द्दयतीति । गन्ध अर्द्दने + बाहुलकात् ओलच् ततो जातौ संज्ञायां वा ङीष् ।) वरटा । इत्यमरः । २ । ५ । २७ ॥ भद्रा । शटी । इति मेदिनी ॥ ले । ८५ ॥

गभस्तिः, पुं, (गम्यते ज्ञायते इति गः विषयः । गम् + डः । तं बभस्ति दीपयति प्रकाशयतीति । भस + " क्तिच्क्तौ चेति । " ३।३।१७४ । इति क्तिच् ।) किरणः । (यथा, भागवते ।५।८।२२ । "मासुपश्यतस्तगतनयं शिशिरशान्तानुराग-गुणितनिजवदनसलिलाम्तमयगभस्तिभिः स्वधयतीति च ॥" गम्यते ज्ञायते इति । गम् + डः । गं इदं सर्वं जगत् बभस्ति भासयति निजकिरणजालैरिति शेषः । भस् + क्तिच् ।) सूर्य्यः । इति मेदिनी ॥ ते ।१०७ ॥ (यथा, सूर्य्यस्तोत्रे । "गभस्तिमान् गभस्तिश्च विश्वात्मा भासकस्तथा । त्वं योनिर्वेदविद्यानां वेदवेद्यस्तथैव च ॥" शिवः । यथा, महाभारते ।१३।१७।१३३ । "गभस्तिर्ब्रह्मकृद् ब्रह्मा ब्रह्मवित् ब्राह्मणोगतिः ॥")

गभस्तिः, स्त्री, (गच्छति प्राप्नोति हव्यादिकमिति गः अग्निस्तं बभस्त्यनया इति । भस + करणे क्तिच् ।) स्वाहा । इति मेदिनी ॥ ते । १०७ ॥

गभस्तिमत्, क्ली, (गभस्तयो रश्मयः नित्यं वर्त्तन्तेऽस्मिन् लोके मणयादिज्योतिःप्रभावात् । इति नित्ययोगे मतुप् ।) सप्तपातालान्तर्गतपातालविशेषः । तत्तु तलातलम् । इति शब्दरत्नावली ॥

गभस्तिमान्, [त्] पुं, (गभस्तयः रश्मयः विद्यन्ते भूम्नास्मिन् । इति भूमार्थे मतुप् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३।३।१६ । "ओं सूर्य्योऽर्य्यमाभगस्त्वष्टा पूषार्कः सविता रविः । गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥")

गभस्तिहस्तः, पुं, (गभस्तयो रश्मयो हस्ता इव जलाद्याकर्षणविसर्ज्जनाय यस्य ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥

गभीरं, त्रि, (गच्छति जलमत्र । गम् + "गभीरगम्भीरौ" । उणां । ४।३५ । इति ईरन् भश्चान्तादेशः ।) नीचस्थानम् । तत्पर्य्यायः । निम्नम् २ गम्भीरम् ३ । इत्यमरः ।१।१०।१५ ॥ गभीरकम् ४ । इति शब्दरत्नावली ॥ अगाधम् । (यथा, प्रबोधचन्द्रोदये ।४।१५ । "निष्कम्पनिर्म्मलपयोधिगभीरधीरा धीराः परस्य परिवादगिरः सहन्ते ॥") गहनम् । इत्युणादिकोषः ॥ (प्रचण्डम् । यथा, भागवते ।१।५।१८ । "कालेन सर्व्वत्र गभीररंहसा ॥")

गभीरिका, स्त्री, (गभीरो ध्वनिर्विद्यतेऽस्याः । "अत इनिठनौ ।" इति ठन् । स्त्रियां टाप् ।) हृहड्ढक्का । इति शब्दरत्नावली ॥

गभोलिकः, पुं, मसूरः । इति हारावली । १३४ ॥

गम, ऌ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) ऌ, गन्ता । ऌ, अगमत् । गतिरुत्तरदेशसंयोगफलकव्यापारः । इति दुर्गादासः ।

गमः, पुं, (गम्यते इति यथायथं भावकर्म्मादौ अप ।) जिगीषोर्गमनम् । इत्यमरः ।२।८।६५ ॥ अक्षविवर्त्तः । स तु द्यूतप्रभेदः । अपर्य्यालोचितम् । अध्वा । इति मेदिनी । मे १० ॥ सहकपाटः । इति हेमचन्द्रः ॥ गमनञ्च ॥ (उपभोगः । मैथुनम् । यथा, मनौ ।११।५४ । "ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ॥")

गमकः पुं, (गमयति प्रापयति बोधयति वा मूर्च्छनादिलक्षणैर्येः आत्मानमिति । गम् + णिच् + ण्वुल् ।) स्वरविशेषः । यथा, सङ्गीतदामोदरे । "गमकः स्वश्रुतिस्थानच्छायां श्रुत्यन्तराश्रयाम् । स्वरो यो मूर्च्छनामेति गमकः स इहोच्यते ॥ कम्पितः स्फुरितो लीनो भिन्नः स्थविर एव च । आहतान्दोलितो चेति गमकाः सप्त कीर्त्तिताः ॥ माघपौषनिशायान्तु शेषप्रहरमात्रके । साधकः सलिले स्थित्वा गमकान् सप्त साधयेत् ॥ दाक्षिणात्या हरिप्रीत्यै गायन्ति गमकानिमान् ॥" (गमयति बोधयतीति । गम् + णिच् + ण्वुल् । बोधकमात्रे त्रि । यथा, मालतीमाधवे । ३ । "यत् प्रौढ़त्वमुदारता च वचसां यच्चार्थतो गौरवं तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः ॥")

गमकारित्वं, क्ली, (गम्यते इति । गम् + भावे अप् । गमं करोतीति । कृ + णिनि । तस्य भावः इति ।) रभसः । इति त्रिकाण्डशेषः ॥

गमथः, पुं, (गच्छत्यस्मिन् इति । गम् + "शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ।" उणां ३ । ११३ । इति अधिकरणे अथः ।) मत्थाः । (गम् + कर्त्तरि अथः ।) पथिके त्रि । इत्युणादिकोषः ॥

गमनं, क्ली, (गम्यते जिगीषुणा इति । गम् + भावे ल्युट् ।) जिगीषोः प्रयाणम् । कूच् इति पारस्य भाषा । तत्पर्य्यायः । यात्रा २ व्रज्या ३ अभिनिर्य्याणम् ४ प्रस्थानम् ५ । गमः ६ । इत्यमरः । २ । ८ । १५ ॥ प्रयाणम् ७ प्रस्थितिः ८ यानम् ९ प्राणनम् १० । इति शब्दरत्नावली ॥ पादविहरणम् । (यथा, रामायणे । ३।१३।११ । "न च मे रोचते वीर ! गमनं दण्डकं प्रति ॥") तत्तु पञ्चविधकर्म्मान्तर्गतकर्म्मविशेषः । (यथा, भाषापरिच्छेदे । ६ । "उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा । प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥") तस्य भेदाः । यथा, भ्रमणम् १ रेचनम् २ स्यन्दनम् ३ ऊर्द्ध्वज्वलनम् ४ तिर्य्यग्गमनम् ५ । इति च भाषापरिच्छेदे । (उपभोगः । यदुक्तं तिथितत्त्वे ।

"अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् । मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥")

गमी, [न्] त्रि, (गमिष्यतीति । गम् + "भविष्यति गम्यादयः ।"३।३।३। "गमेरिनिः ।"उणां।४।६ । इति भविष्यति इनिः ।) गमनकर्त्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) गम्बति । इति दुर्गादासः ॥

गम्भारिका, स्त्री, (गच्छति दार्ढ्यं सौन्दर्य्यभारञ्च इति । निम्नगतिमिर्ल्लौके । गम् + विच् । गमं बिभर्त्ति इति । भृ + ण्वुल् ततष्टाप् कापि अत इत्वञ्च ।) गम्भारीवृक्षः । इति राजवल्लभः ॥

गम्भारी, स्त्री, (कं जलं बिभर्त्ति इति । भृ + "कर्म्मण्यण् । " ३ । २ । १ । इति अण् पृषोदरात् कस्य गत्वं साधुः । यद्वा गच्छति प्राप्नोति सौन्दर्य्यमिति । गम् + विच् । गमं बिभर्त्तीति ।) वृक्षविशेषः । गामारी इति भाषा ॥ तत्पर्य्यायः । सर्व्वतोभद्रा २ काश्मरी ३ मधुपर्णिका ४ श्रीपर्णी ५ भद्रपर्णी ६ काश्मर्य्यः ७ । इत्यमरः । २ । ४ । ३५ ॥ काश्मीरी ८ । इति तट्टीका ॥ भद्रा ९ गोपभद्रिका १० कुमुदा ११ सदाभद्रा १२ कटफला १३ कृष्णवृन्तिका १४ । इति रत्नमाला ॥ कृष्णवृन्ता १५ हीरा १६ सर्व्वतोभद्रिका १७ स्निग्धपर्णी १८ सुभद्रा १९ कश्मारी २० गोपभद्रा २१ विदारिणी २२ चौरिणी २३ महाभद्रा २४ मधुपर्णी २५ स्वरभद्रा २६ कृष्णा २७ अम्बिता २८ रोहिणी २९ पुष्टिः ३० स्थूलत्वचा ३१ मधुमती ३२ सुफला ३३ मेदिनी ३४ महाकुसुदा ३५ सुदृढ़त्वचा ३६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । भ्रमशोषत्रिदोषविषदाहार्त्तिज्वरतृष्णास्रदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ एतत्फलगुणाः । तिक्तत्वम् । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । केशहितत्वम् । रसायनत्वम् । मेध्यत्वम् । प्रीतत्वम् । दाहपित्तनाशित्वञ्च । एतन्मूलगुणौ । अम्लत्वम् । मानसबाधौ अहितकारित्वञ्च । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः । "गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका । काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ॥ कृष्णवृन्ता मधुरसा महाकुसुदिकापि च । काश्मरी तुवरा तिक्ता वीर्य्योष्णा मधुरा गुरुः ॥ दीपनी पाचनी मेध्या भेदिनी भ्रमशोषजित् । दोषतृष्णामशूलार्शोविषदाहज्वरापहा ॥ तत्फलं बृंहणं वृष्यं गुरु केश्यं रसायनम् । वातपित्ततृषारक्तक्षयमूत्रविबन्धहृत् ॥ स्वादु पाके हिमं स्निग्धं तुवराम्लं विशुद्धिकृत् । हन्याद्दाहतृषावातरक्तपित्तक्षतक्षयान् ॥" इति भावप्रकाशः ॥